Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 23

No. of Printed Pages – 7

**P–95–Sanskritam - II (D&D)**

# प्रवेशिका (मूक–बधिर) परीक्षा, 2022

# PRAVESHIKA (D&D) EXAMINATION, 2022

## संस्कृतम्

## (द्वितीय– प्रश्नपत्रम्)

**समय :** 3:45 **होराः**

**पूर्णांक :** 80

**परीक्षार्थिभ्यः सामान्य–निर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः।

2) सर्वे प्रश्नाः अनिवार्याः।

3) प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव लेख्यम्।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम्।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

## खण्ड – अ

**1)** वस्तुनिष्ठ प्रश्नाः **[12 × 1 = 12]**

i) आत्मानं कानिं न छिन्दन्ति – **[1]**

क) पाषाण खण्डानि	ख) आभूषणानि

ग) शस्त्राणि	घ) कटुवचनानि

ii) सर्वे गुणाः किम् आश्रयन्ते – **[1]**

क) वैदुष्यम्	ख) बलम्

ग) काञ्चनम्	घ) सम्मानम्

iii) केषां मैत्री छायेव भवति? **[1]**

क) गुरूशिष्याणाम्	ख) खलसज्जनानाम्

ग) धीवरमत्स्यानाम्	घ) गोव्याघ्राणाम्

iv) राज्ञः वचनाद् रामः कुत्र पतितुं कथयति? **[1]**

क) आकाशे	ख) पावके

ग) कूपे	घ) नद्याम्

v) अमर कोशस्य अपरं नाम अस्ति? **[1]**

क) नामलिङ्गानुशासनम्	ख) शब्द सागरः

ग) अमरसिंह संग्रहः	घ) रामाश्रयी

vi) पञ्चतन्त्रस्य रचनाकारो वर्तते – **[1]**

क) पं. नारायणः	ख) पं. विष्णु शर्मा

ग) भर्तृहरिः	घ) भासः

vii) कम्बुग्रीवः नाम आसीत्– **[1]**

क) कच्छपस्य	ख) हंसस्य

ग) मूषकस्य	घ) शशकस्य

viii) ताम्रचूड: आसीत्? [1]

क) मूषक: ख) परिव्राजक:

ग) नृप: घ) मार्जार:

ix) सिंहेन स्वगृहमागच्छता क: प्राप्त:? [1]

क) सिंहशिशु: ख) गजसुत:

ग) श्रृगालसुत: घ) मूषक:

x) 'प्राप्य' इत्यत्र प्रत्यय: वर्तते? [1]

क) क्यप् ख) यत्

ग) ल्यप् घ) तव्यत्

xi) ''ममायं तृतीय: पुत्रो भविष्यति''। इति केन कथितम्? [1]

क) सिंहेन ख) गजेन

ग) श्रृगाल्या घ) सिंह्या

xii) बालक–शब्दस्य–तृतीया–विभक्ति–बहुवचने रूपं भवति? [1]

क) बालकस्य ख) बालकै:

ग) बालकानाम् घ) बालकेभ्य:

2) रिक्तस्थानानि पूरयत – [6×1=6]

i) कर्मण्येवाधिकारस्ते, मा ........... । [1]

ii) सेवा धर्म: परमगहनो .............. । [1]

iii) प्रकृति सिद्ध मिदं हि .............. । [1]

iv) करिष्ये प्रतिजाने च रामो ............ । [1]

v) काम: क्रोधस्तथा लोभस्तस्मादेतत् ............ । [1]

vi) विभाति काय: करूणा कुलानां, परोपकारेण ............ । [1]

3) अधोलिखित प्रश्नानाम् उत्तराणि एकशब्देन लिखत। [12×1= 12]

i) मारूतः कं न शोषयति? [1]

ii) छन्द शास्त्रानुसारेण गणाः कति भवन्ति? [1]

iii) ''हंस इव छवलो बकः'' इत्यत्र कः अलंकारः अस्ति? [1]

iv) मूषकराजस्य नाम किम् आसीत्? [1]

v) चुर्–धातोः लट् लकारस्य प्रथम पुरूषस्य बहुवचनस्य रूपं लिखत? [1]

vi) मातृ–शब्दस्य तृतीया–विभक्ति–एकवचनस्य रूपं लिखत। [1]

vii) महर्षेः वरतन्तोः शिष्यः कः आसीत्? [1]

viii) सिंहदम्पती कुत्र प्रतिवसतः स्म? [1]

ix) ''तस्मान्ममाऽयं तृतीयः पुत्रो भविष्यति'' इति केन कथितम्? [1]

x) ''अहो धिङ्नार्हसे देवि'' इति केन कथितम्? [1]

xi) रामः कति वर्षाणि दण्डकारण्ये निवसेत् इति कैकयी इच्छति [1]

xii) यस्य समीपे वित्तमस्ति स नरः कीदृशः मन्यते? [1]

## <u>खण्ड – ब</u>

4) ब्रह्मचर्यम् अहिंसा च कीदृशंतपः उच्यते? [2]

5) महतां चित्तम् आपत्सु कीदृशं भवति? [2]

6) मालिनी छन्दसः लक्षणं लिखत। [2]

7) वसन्ततिलका छन्दसः उदाहरणं लिखत। [2]

8) उपमालंकारस्य लक्षणं लिखत। [2]

9) अनुप्रास–अलंकारस्य उदाहरणं लिखत। [2]

10) अमरकोशानुसारं कृष्णस्य नामद्वयं लिखत। [2]

11) गणेशस्य नामद्वयं लिखत। [2]

12) ताम्रचूडः भिक्षापात्रं केन ताडयति स्म? [2]

13) 'परित्यज्य' इत्यत्र कः प्रत्ययः? [2]

14) गृहं प्रति कः प्रधावितः? [2]

15) 'अस्मद्' शब्दस्य तृतीया–विभक्तेः रूपाणि लिखत? [2]

16) कृ–धातोः लृट्लकारस्य प्रथमपुरूषस्य रूपाणि लिखत। [2]

## खण्ड – स

17) अधोलिखितयोः श्लोकयोः एकस्य सप्रसङ्ग व्याख्या लेखनीया। [1+2=3]

(क) कुसुमस्तबकस्मेव द्वयी वृत्तिर्मनस्विनः।
मूर्ध्नि वा सर्वलोकस्य, शीर्यते वन एव वा।।

(ख) पुरा देवासुरे युद्धे पिता ते मम राघव।
रक्षितेन वरौ दत्तौ, सशल्येन महारने।।

18) अधोलिखितयोः श्लोकयोः एकस्य सप्रसङ्ग भावार्थः लेखनीयः। [1+3=4]

(क) यः प्रीणयेत् सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिंच्छति तत्कलत्रम्।
तन्मित्रमापदि सुखे च समक्रिय य –
देतत्त्रयं जगतिं पुण्यकृतो लभन्ते।।

(ख) श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेनपाणि र्न तु कङ्कणेन।
विभाति कायः करूणाकुलानां परोपकारेण न चन्दनेन।।

19) अधोलिखितयोः श्लोकयोः एकस्य सप्रसङ्ग व्याख्या लेखनीया। [1+3=4]

(क) मौनान्मूकः प्रवचनपदुर्वाचकों जल्पको वा।
धृष्टः पार्श्वे भवति च वसन् दूरतोऽप्यप्रगल्भः।
क्षान्त्मा भीरू र्यदि न सहते प्रायशो नाभिजातः,
सेवाधर्मः परमगहनो योगिनामप्यगम्यः।।

(ख) तमध्वरेविश्वजिति क्षितीशं,
निःशेष विश्राणित कोष जातम्।
उपात्तविधो गुरूदक्षिणार्थी
कौत्सः प्रपेदे वरतन्तु शिष्यः।।

20) कस्याश्चिदे कस्याः कथायाः सारांशः संस्कृतेन लेख्यः। [3]

(क) काष्ठ भ्रष्टकच्छपकथा

(ख) सिंह शिशु श्रृगाल पुत्र कथा

## खण्ड – द

21) अधोलिखित गद्ययोः कस्यचिद् एकस्य सप्रसंग-व्याख्या लेखनीया। [3]

(क) अथ तौ द्वावपि भ्रातरौ गृहं प्राप्य पित्रोरग्रतो विहसन्तौ ज्येष्ठ भ्रातृ चेष्टित मूचतुः यथा– "गजं दृष्ट्वा दूरतोऽपि प्रनष्टः। सोऽपि तदाकर्ण्य कोपाविष्ट मनाः प्रस्फुरिताऽधरपल्लवस्ताम्र लोचनः त्रिसिखां भृकुटिं कृत्वा तौ निर्भर्त्सयन् परूषतरवच ना न्युवाच।

(ख) तदाकर्ण्याऽहं (हिरण्यकः) सकलयूथपरिवृतः तत्र गतः। उत्पत्य च तस्मिन् भिक्षापात्रे समारूढ़ः। तत्र भक्ष्यविशेषाणि सेवकानां दत्त्वा। पश्चात्स्वयमेवं भक्षयामि। एवं नित्यमेव सदलं भक्षयामि।

22) भवान् राघवेन्द्रः, राजकीय-वरिष्ठ-उपाध्याय संस्कृत विद्यालय [3]

विद्याधरनगरस्य छात्रः कनिष्ठ भ्रातुः विवाहाय दिनत्रस्य अवकाशार्थ प्रार्थना पत्र लिखतु।

अथवा

भवतः ग्रामस्यः – पेयजलव्यवस्थार्थं समुचित विकासार्थञ्च सरपंच-महोदयस्य कृते प्रार्थनापत्रं लिखतु।

23) कमप्येकं विषयमवलम्ब्य निबन्धं लिखत। [4]

(क) संस्कृत दिवसः

(ख) मम प्रियः कविः

(ग) श्री रामः

DO NOT WRITE ANYTHING HERE